श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

**श्री अभीतिस्तवः**

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि॥

अभीतिरिह यज्जुषां यद् अवधीरितानां भयं
भयाभय विधायिनो जगति यन्निदेशे स्थिताः।
तदेत दतिलङ्घित द्रुहिण शम्भु शक्रादिकं
रमासख मधीमहे किमपि रङ्गधुर्यं महः॥१

दया शिशिरिताशया मनसि मे सदा जागृयुः
श्रियाऽध्युषित वक्षसः श्रित मरुद्वृधा सैकताः।
जगद्दुरित घस्मरा जलधि डिम्भ डम्भ स्पृशः
सकृत् प्रणत रक्षण प्रथित संविदः संविदः॥ २

यदद्य मित बुध्दिना बहुळ मोह भाजा मया
गुण ग्रथित काय वाङ्मनस वृत्ति वैचित्र्यतः
अतर्कित हिताहित क्रम विशेषम् आरभ्यते
तदप्युचितम् अर्चनं परिगृहाण रङ्गेश्वर॥३

मरुत्तरणि पावक त्रिदश नाथ कालादयः
स्व कृत्यम् अधिकुर्वते त्वद् अपराधतो बिभ्यतः।
महत् किमपि वज्रम् उद्यतम् इवेति यच्छ्रूयते
तरत्यनघ तद्भयं य इह तावकः स्तावकः॥४

भवन्तम् इह यः स्वधी नियत चेतना चेतनं



rmvenkat@yahoo.com

पनायति नमस्यति स्मरति वक्ति पर्येति वा।
गुणं कमपि वेत्ति वा तव गुणेश गोपयितुः
कदाचन कुतश्चन क्वचन तस्य न स्याद् भयम्॥५

स्थिते मनसि विग्रहे गुणिनि धातु साम्ये सति
स्मरेद् अखिल देहिनं य इह जातुचित् त्वामजम्।
तयैव खलु संधया तमथ दीर्घ निद्रा वशं
स्वयं विहित संस्मृतिर् नयसि धाम नैः श्रेयसम्॥६

रमा दयित रङ्गभू रमण कृष्ण विष्णो हरे
त्रिविक्रम जनार्दन त्रियुग नाथ नारायण।
इतीव शुभदानि यः पठति नामधेयानि ते
न तस्य यमवश्यता नरक पात भीतिः कुतः॥७

कदाचिद् अपि रङ्गभू रसिक यत्र देशे वशी
त्वदेक नियत आशयस्त्रिदश वन्दितो वर्तते।
तदक्षत तपोवनं तव च राजधानी स्थिरा
सुखस्य सुखम् आस्पदं सुचरितस्य दुर्गं महत्॥८

त्रिवर्ग पथ वर्तिनां त्रिगुण लङ्घन उद्योगिनां
द्विषत् प्रमथन अर्थिनाम् अपि च रङ्ग दृश्योदयाः।
स्खलत्समय कातरी हरण जागरूकाः प्रभो
कर ग्रहण दीक्षिताः क इव ते न दिव्या गुणाः॥९

बिभेति भवभृत् प्रभो त्वदुपदेश तीव्रौषधात्
कदध्व रस दुर्विषे बलिश भक्षवत् प्रीयते।
अपथ्य परिहारधी विमुखम् इत्थ माकस्मिकी
तमप्यवसरे क्रमा दवति वत्सला त्वद्दया॥१०

अपार्थ इति निश्चितः प्रहरणादि योगस्तव
स्वयं वहसि निर्भयस् तदपि रङ्ग पृथ्वीधर।
स्वरक्षणम् इवाभवत् प्रणत रक्षणं तावकं

यदात्थ परमार्थविन् नियत मन्तरामेति ते ॥११

लगिष्ठ सुख सङ्गदैः सवकृत कर्म निर्वर्तितैः
कलत्र सुत सोदरानुचर बन्धु सम्बन्धिभिः।
धन प्रभृतिकैर् अपि प्रचुर भीति भेदोत्तरैः
न बिभ्रति धृतिम् प्रभो त्वद् अनुभूति भोगार्थिनः ॥१२

न वक्तुम् अपि शक्यते नरक गर्भ वासादिकं
वपुश्च बहुधातुकं निपुण चिन्तने तादृशम्।
त्रिविष्टप मुखं तथा दिवि पदस्य दीव्यतः
किमत्र न भयास्पदं भवति रङ्ग पृथ्वी पते ॥१३

भवन्ति मुख भेदतो भय निदानमेव प्रभो
शुभाशुभ विकल्पिता जगति देश काला दयः।
इति प्रचुर साध्वसे मयि दयिष्यसे त्वं न चेत्
क इत्थ मनुकम्पिता त्वद् अनुकम्पनीयश्च कः ॥१४

सकृत् प्रपदन स्पृशा मभय दान नित्य व्रती
न च द्विर् अभिभाषसे त्वमिति विश्रुतः स्वोक्तितः।
यथोक्त करणं विदुस्तव तु यातु धानादयः
कथं वितथमस्तु तत् कृपण सार्व भौमे मयि ॥१५

अनुक्षण समुत्थिते दुरित वारिधौ दुस्तरे
यदि क्वचन निष्कृतिर् भवति साऽपि दोषाविला।
तदित्थम् अगतौ मयि प्रति विधान माधीयतां
स्वबुध्दि परिकल्पितं किमपि रङ्ग धुर्य त्वया ॥१६

विषाद बहुलादहं विषय वर्गतो दुर्जयात्
बिभेमि वृजिनोत्तरस् त्वदनुभूति विच्छेदतः।
मया नियत नाथवा नयमिति त्वम् अर्थायन्
दयाधन जगत्पते दयित रङ्ग संरक्ष माम् ॥१७

निसर्ग निर निष्टता तव निरंहसः श्रूयते ।
ततस्त्रियुग सृष्टिवत् भवति संहृतिः क्रीडितम्
तथाऽपि शरणागत प्रणय भङ्ग भीतो भवान्
मदिष्टमिह यद्भवेत् किमपि मास्म तज्जीहपत् ॥१८

कयाधु सुत वायस द्विरद पुङ्गव द्रौपदी
विभीषण भुजङ्गम व्रज गणाम्बरीषादयः ।
भवत् पद समाश्रिरता भय विमुक्तिम् आपुर्यथा
लभेमहि तथा वयं सपदि रङ्गनाथ त्वया ॥१९

भयं शमय रङ्ग धाम्नि अनितर अभिलाष स्पृषां
श्रियम् बहुलय प्रभो श्रित विपक्षम् उन्मूलय ।
स्वयम् समुदितं वपुस्तव निशामयन्तः सदा
वयं त्रिदश निर्वृतिं भुवि मुकुन्द विन्देमहि ॥२०

श्रियः परिबृढे त्वयि श्रित जनस्य संरक्षके
सद् अद्भुत गुणो दधा विति समर्पितोऽयं भरः ।
प्रतिक्षण मतः परं प्रथय रङ्ग धामादिषु
प्रभुत्वम् अनुपाधिकं प्रथित हेतिभिर् हेतिभिः२१

कलिप्रणिधि लक्षणैः कलित शाक्य लोकायतैः
तुरुष्क यवनादिभिर् जगति जृम्भमाणं भयम् ।
प्रकृष्ट निज शक्तिभिः प्रसभं आयुधैः पञ्चभिः
क्षिति त्रिदश रक्षकैः क्षपय रङ्गनाथ क्षणात् ॥२२

दिति प्रभव देहभिद् दहन सोम सूर्यात्मकं
तमः प्रमथनं प्रभो समुदितास्त्र बृन्दं स्वतः ।
स्व वृत्ति वशवर्तित त्रिदशवृत्ति चक्रं पुनः
प्रवर्तयतु धाम्नि ते महति धर्म चक्र स्थितिम् ॥२३

मनु प्रबृति मानिते महति रङ्गधामादिके

दनुप्रभव दारुणैर् दरम् उदीर्यमाणं परैः।
प्रकृष्ट गुणक श्रया वसुधया च संधुक्षितः
प्रयुक्त करुणोदधिः प्रशमय स्व शक्तया स्वयम्॥२४

भुजङ्गम विहङ्गम प्रवर सैन्य नाथाः प्रभो
तथैव कुमुदादयो नगर गोपुर द्वारपाः।
अचिन्त्य बल विक्रमास् त्वमिव रङ्ग संरक्षकाः
जितंत इति वादिनो जगद् अनुग्रहे जाग्रतु॥२५

विधिस् त्रिपुर मर्दन स्त्रिदश पुङ्गव पावकः
यम प्रभृतयोऽपि यद्विमत रक्षणे न क्षमाः।
रिरक्षिषति यत्र च प्रतिभयं न किञ्चित् क्वचित्
स नः प्रतिभटान् प्रभो शमय रङ्ग धामादिषु॥२६

स कैटभ तमो रविर् मधुपराग झञ्झा मरुत्
हिरण्य गिरि दारण स्त्रुटित कालनेमि द्रुमः।
किमत्र बहुना भजद् भव पयोधि मुष्टिन्दयः
त्रिविक्रम भवत् क्रमः क्षिपतु मङ्क्षु रङ्ग द्विषः॥२७

यतिप्रवर भारती रस भरेण नीतं वयः
प्रपुल्ल पलितं शिरः परमिह क्षमं प्रार्थये।
निरस्त रिपु संभवे क्वचन रङ्गमुख्ये विभो
परस्पर हितैषिणां परिसरेषु मां वर्तय॥२८

प्रबुध्द गुरु वीक्षण प्रथित वेङ्कटेशोद् भवाम्
इमाम् अभय सिध्दये पठत रङ्गभर्तुः स्तुतिम्।
भयं त्यजत भद्रम् इति अभिदधत् स वः केशवः
स्वयं घन घृणा निधिर् गुणगणेन गोपायति॥२९

कवितार्किक सिंहाय कल्याण गुण शालिने।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः॥

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com